**दिनाङ्क:-21.03.2026**

**प्रात: - 06:55**

**अथ वार्ता:**

**पश्चिम-एशियास्थिति**

केंद्रशासनेन समाश्वासितं यत् ऊर्जोत्पादन सम्बद्धानि समेषानि यन्त्रागार संयंत्राणि सम्प्रति कार्यान्वयनयुतानि सन्ति। अथ पर्याप्त – अशोधित – तैलोत्पादनेन सह उच्चतमक्षमतास्तरे प्रर्वतमानि सन्ति।

गतदिने नवदेहल्यां पश्चिम एशिया घटनाक्रमेषु आयोजितं वार्ताहर- सभां पेट्रोलियम- प्रकृतिक गैस मंत्रालयस्य संयुक्त सचिव पदासीना सुजाता शर्मा सम्बोधितवती। प्रोक्तवती च यत् सम्प्रति एलजीपी इत्यस्य उत्पादनं स्थिरम्, पर्याप्तभण्डार समग्री उपलब्धा चापि। अग्रे प्रोक्तवती यत् उच्चतम – गुणवत्तायुक्त पेट्रोलियम मूल्येषु न्यूनतमा वृद्धि: जाता, यत्र सामान्य पेट्रोलमूल्येषु न कापि वृद्धि: जाता।

नौवहन- जलमार्ग मन्त्रालयस्य विशेषसचिव: राजेश कुमार: सिन्हा विज्ञापितवान् यत् विगत- चतुर्विंशति होरासु न कपि सामुद्रिक- घटना दरीदृष्टा अथ सर्वा: द्वाविंशति नौका: एकादशाधिक षट्शतं भारतीय-नाविकाश्चापि सुरक्षिता: सन्ति।

**बहरीन**

प्रधानमंत्री नरेन्द्रमोदी गतिदिने बहरीन देशस्य राजा हमद बिन ईसा अल खलीफा इत्यमुना साकं दूरभाषमाध्यमेन मंत्रणां कृतवान। संचार तन्त्रपटले प्रधानमंत्री मोदी प्रकाशितवान् यत् उभौ पश्चिम – एशिया क्षेत्रस्य वर्तमानस्थिति – विषये चर्चां कृतवन्तौ । ऊर्जा नागरिक- अवसंरचनासु आक्रमणानि अपि उभाभ्यां निन्दितानि। श्री मोदी नौवहनस्वतंत्रतां सुनिश्चेतुं नौवहन- प्रक्रमणानि सुरक्षितं कर्तुं बलं दत्तवान्। प्रधानमंत्री मन्त्रणाक्रमे ईद पर्वणं: शुभकामना: प्रकाशितवान् स्वदेशे समुदाय कल्याणकृते नैरन्तर्येण समर्थनप्रदानाय धन्यवादमपि प्रकटितवान् ।

**सी आर पाटिल**

केंद्रीय जलशक्ति मंत्री सी आर पाटिल: प्रोक्तवान् यत् शासनस्य हर घर जल इत्याभियानस्य लक्ष्यं ग्रामीण भारतस्य जनानां जीवने पीरिर्वतनं वर्तते। श्री पाटिल: गतिदिने गुजरात, हरियाणा, हिमाचलप्रदेश, छत्तीसगढ़, गोवा राज्ये: सह जल जीवन मिशन इत्यभिया नान्तर्गतं अनुबंध – ज्ञापनेषु हस्ताक्षरं कुर्वन् एतानि वक्तव्यानि प्रकटितवान् प्रोक्तवान् यत् । हर घर जल ग्राम सुजलं इत्याभियानस्य उद्देश्यं ग्रामीण क्षेत्रेषु गरिमा- स्वास्थ्य सशक्तिकरणस्य च सम्वर्धनं वर्तते।

**राष्ट्रपति**

राष्ट्रपति- पदासीमा द्रौपदी मुर्म: अद्य राज्यस्य स्वीयायात्राया: तृतीये दिने उत्तरप्रदेशस्य मथुरा जनपदस्य गोवर्धन धाम स्थले यात्रारता भवेत्, दानघाटी मंदिरे च अर्चनां विदध्यात्।

गोवर्धन पर्वतीय धार्मिक महत्वं बहुअख्यापितं, यतोहि भागवत कृष्णेन एतस्य -सामीप्यं ज्ञातमेव |

**ईद-उल- फितर**

देशे अद्य ईद-उल- फितर इति पर्व सोत्साहेन आचर्यन्ते। एतत पर्व पवित्र रमजान मासे उपवास समापनस्य प्रतीकत्वेन ज्ञायते। ए तदवसरे श्रद्धालव: पारंपरिक परिधान सज्जीभूत्वा ईदगाह मस्जिद इत्यत्र नमाजध्यानरता: भवेयु:। राष्ट्रपति पदासीना द्रौपदी मुर्मु: समेभ्य: शुभकामना: दत्तवती ।

**।।इति वार्ता:।।**